जय गुरु दत्त

श्री श्री श्री गणपति सच्चिदानंद सद्गुरु पूजा विधिः

संकल्पं
सकल देवात्मक श्री श्री श्री गणपति सच्चिदानंद सद्गुरु पूजां यथाशक्ति करिष्ये ।

ध्यानं
कूर्चाभिराम स्मित मंजु वक्त्रं काषाय वस्त्रावृत नील देहं ।
ध्यायेत् बृहच्चित्रक शोभि फालं श्री सच्चिदानंद गुरुं प्रसन्नं ॥

काषाय वस्त्र रुचिरंजित वर्ष्मणा वा भक्तेष्ट दैवत लसद्वपुषाथवापि ।
योगांचलेष्वथ विशुद्ध निजात्मना वा स्वं भासयंतमनघं गुरुदेव मीडे ॥
श्री सद्गुरुभ्यो नमः । ध्यायामि ।

आवाहनं

यो विश्व विस्तारित भक्तवर्गस्यात्मीय साक्षात्कृति नित्य भाग्यं ।
तत्तत्प्रदेशेषु तनोति तंत्वामावाहयामीह गुरो प्रसीद ॥
श्री सद्गुरुभ्यो नमः । आवाहयामि ।

कृपाब्धे श्री गणपति सच्चिदानंद सद्गुरो ।
सुस्थिरोत्र भव स्वामिन् यावत्त्वां पूजयाम्यहं ॥
श्री सद्गुरु प्रभो । स्थिरो भव । वरदो भव । सुप्रसन्नो भव ।

आसनं

प्रपंच विख्यापित दत्तपीठ श्री धर्म सिंहासन चक्रवर्तिन् ।
योगासनारूढ गुरो प्रदत्तं सुखासनं स्वीक्रियतां कृपाब्धे ॥
श्री सद्गुरुभ्यो नमः । आसनं समर्पयामि ।

पाद्यं

मुनीश्वर सहस्रार पद्म किंजल्करूषितौ ।
सद्गुरो अनुजानीहि पाद्येन क्षाळये पदौ ॥
श्री सद्गुरुभ्यो नमः । पादयोः पाद्यं समर्पयामि ।

अर्घ्यं
स्वतो विशुद्धं गुरुदेव यं करं करोषि मे मूर्ध्नि तमोमये द्राक् ।
तमीश संविद्विशदार्घ्य वार्भिः संभावयाम्यादिगुरो प्रसीद ॥
श्री सद्गुरुभ्यो नमः । हस्तयोः अर्घ्यं समर्पयामि ।

आचमनं
त्रिलोकी तृप्यति स्वामिन् त्रिपुटी च विलुप्यति ।
त्रिस्त्वयाचम्यता मेतैश्शुद्धोदैस्त्रिजगद्गुरो ॥
श्री सद्गुरुभ्यो नमः । मुखे आचमनं समर्पयामि ।

मधुपर्कं
आपृक्तोस्यमृतैर्नूनं आमूलाग्रं गुरु प्रभो ।
तथाप्यंगीकुरु स्वामिन् मधुपर्कं मदर्पितं ॥
श्री सद्गुरुभ्यो नमः । मधुपर्कं समर्पयामि ।

स्नानं
द्विजवर समुदीर्ण श्रौतगीती तरंगोन्मिलित सकल वेणी वारिधारा प्रसारैः ।

तवहि विमल देहे मत्करोद्वर्तिते श्री गणपति गुरुदेव स्नानमाकल्पयामि ॥
श्री सद्गुरुभ्यो नमः । शुद्धोदक स्नानं समर्पयामि ।

वस्त्रं
काषाय वस्त्रं यतिराज मंजुलं कौशेयकं स्वर्ण दशाग्र चित्रितं ।
क्षौमं महायोगिगुरो सितं च समर्पये तेखिल देवतात्मन् ॥
श्री सद्गुरुभ्यो नमः । वस्त्रं समर्पयामि ।

यज्ञोपवीतं
चतुर्वर्णाश्रमोदार व्यवस्थातीत सद्गुरो ।
निस्त्रैगुण्यावधूत त्वं यज्ञ सूत्रं प्रतीच्छ मे ॥
श्री सद्गुरुभ्यो नमः । यज्ञोपवीतं समर्पयामि ।

गंधं
भ्रूमध्यभागे समुदीर्णरोचिषि श्रीचंदनोन्मिश्रित रक्तगंधैः ।
राकेंदु तुल्यं तिलकं लिखेयं गुरो त्रिनेत्रोपम देह्यनुज्ञां ॥
श्री सद्गुरुभ्यो नमः । श्री गंधान् धारयामि । गंधस्योपरि कुंकुमं अक्षतां च अलंकरोमि ।

सुगंध द्रव्यं
विचित्र सौरभावळी घुमंघुमद्दिशांचलै स्स्वदेश वस्तु संभवैर्विदेश संभृतैरपि ।
मदीय पूर्ववासना परंपरा निवृत्तये सुगंधि वस्तुभिर् गुरोस्तनुं मुदानुलेपये ॥
श्री सद्गुरुभ्यो नमः । नानाविध सुगंध द्रव्यानुलेपनं समर्पयामि ।

आभरणं
रुद्राक्ष भद्राक्ष सरोरुहाक्ष बृंदाक्ष शुद्ध स्फटिकाक्ष माल्यैः ।
विचित्र रत्नाक्षयुतैक्ष सच्चिदानंद देशिक भवंतमलंकरोमि ॥
श्री सद्गुरुभ्यो नमः । आभरणानि समर्पयामि ।

पुष्पं
मनस्सरोजं मम मध्यगुच्छं कृत्वेंद्रियानीक सुमस्रगाळ्यां ।
ताभिर्गुरूत्तं समलंकरोमि मधुर्यथा माधवमाशिर्ॐघ्रि ॥

श्री गुरुभ्यो नमः । पुष्पैः समर्पयामि ।

अथ अंगपूजा

ॐ भक्त कंटक हारिणे नमः गुरुपादुके पूजयामि

ॐ श्रुति सीमंत संचाराय नमः पादतले पूजयामि

ॐ शिष्यानुरक्ताय नमः पादांगुळीः पूजयामि

ॐ जगत्पूज्याय नमः पादौ पूजयामि

ॐ जगद्गुरवे नमः जंघे पूजयामि

ॐ जयलक्ष्मी सुताय नमः जानुनीपूजयामि

ॐ नरसिंह तनूजाय नमः ऊरू पूजयामि

ॐ जगन्मूलाय नमः मूलाधारं पूजयामि

ॐ दत्तात्रेय स्वरूपाय नमः कटिं पूजयामि

ॐ अनादि ब्रह्मचारिणे नमः स्वाधिष्ठानं पूजयामि

ॐ गणपत्यवताराय नमः उदरं पूजयामि

ॐ भक्त चिंतामणयेनमः मणिपूरं पूजयामि

ॐ दयासमुद्राय नमः हृदयं पूजयामि

ॐ प्रणव स्वरूपाय नमः अनाहतं पूजयामि

ॐ आश्रितानीक भारधृते नमः स्कंधौ पूजयामि

ॐ मोहच्छिदे नमः बाहू पूजयामि

ॐ अभय प्रदाय नमः हस्तौ पूजयामि

ॐ संकीर्तन पराय नमः कंठं पूजयामि

ॐ पंक्तिपावन पावनाय नमः विशुद्धं पूजयामि

ॐ प्रणवाकार केशाग्राय नमः कूर्चं पूजयामि

ॐ सूक्ति पीयूष वर्षिणे नमः वक्त्रं पूजयामि

ॐ जगन्मोहनाय नमः मंदस्मितं पूजयामि

ॐ प्रपंच विश्रुताय नमः कर्णौ पूजयामि

ॐ साक्षि मात्राय नमः नेत्रे पूजयामि

ॐ विज्ञाननिधये नमः आज्ञाचक्रं पूजयामि

ॐ भस्मौषधप्रदाय नमः फालं पूजयामि

ॐ आनंद शिखराय नमः शिरः पूजयामि

ॐ सहस्रशीर्षाय नमः सहस्रारं पूजयामि

ॐ सच्चिदानंदाय नमः सर्वाण्यंगानि पूजयामि

ॐ सद्गुरुभ्यो नमः । नानाविध पत्र पुष्पाक्षतान् समर्पयामि ।

श्री श्री श्री गणपति सच्चिदानंद सद्गुरु अष्टोत्तरशत

नामावळि

श्री सद्गुरवे नमः

श्री सच्चिदानंदाय नमः

श्री सज्जन श्रीप्रदाय नमः

श्री शिवाय नमः

श्री जयलक्ष्मी सुताय नमः

श्री नित्याय नमः

श्री नृसिंह तनयाय नमः

श्री नवाय नमः

श्री कावेरी सलिलोत्पन्नाय नमः

श्री चित्रभानु शरद्भवाय नमः

श्री ब्रह्मकुंड प्रभारूपाय नमः

श्री भारद्वाजस गोत्रकाय नमः

श्री कावेर्यर्का संग सक्ताय नमः

श्री त्रिशैलांतर बिंदुगाय नमः

श्री जयलक्श्मी पुरावासाय नमः

श्री क्रीडाव्यक्त तपोबलाय नमः

श्री श्रुतिभंगक्लांत चित्ताय नमः

श्री स्वमातृ बोधित योगकाय नमः

श्री कोदंडराम सुप्रीताय नमः

श्री कोमलाय नमः
श्री गूढ साधनाय नमः
श्री श्रीविद्या निपुणाय नमः
श्री राजयोग मार्गगाय नमः
श्री ऊर्जिताय नमः
श्री एकादश वयः प्राप्त शक्तिपाताय नमः
श्री गुरुप्रियाय नमः
श्री आंजनेयालयासक्ताय नमः
श्री राजेशी दर्शनोत्सवाय नमः
श्री भल्लूक मित्राय नमः
श्री भद्रांगाय नमः
श्री हठयोग समाश्रिताय नमः
श्री ध्वजस्तंभाग्र संचाराय नमः
श्री हठात् खंडित लंबिकाय नमः
श्री सामुद्रिक सुरेखाढ्याय नमः
श्री नागमित्राय नमः
श्री शुचिस्मिताय नमः
श्री गुरु सेवारताय नमः
श्री साधुप्रियाय नमः
श्री मधुकर व्रताय नमः

श्री जितवैराय नमः

श्री जितासंगाय नमः

श्री जितौदासीन्याय नमः

श्री उन्नताय नमः

श्री गणेशदत्त ब्रह्मोपदेशाय नमः

श्री अंतर्मुखस्थितये नमः

श्री अर्कमूल रताय नमः

श्री लोकविद्या विमुखाय नमः

श्री उत्तमाय नमः

श्री अर्क विघ्नेश सारथ्याय नमः

श्री प्रश्न विघ्नेश बोधिताय नमः

श्री शांति विघ्नेश्वराकाराय नमः

श्री महिमोद्धर्षकाय नमः

श्री प्रभवे नमः

श्री गणेशहोम संसक्ताय नमः

श्री विख्याताय नमः

श्री विबुधाश्रिताय नमः

श्री विद्युत्तंत्री स्पर्शदक्षाय नमः

श्री योगविद्युत् प्रदाय नमः

श्री विभवे नमः

श्री भक्त रोगहराय नमः
श्री भक्त नानाकष्ट निवारकाय नमः
श्री सत्यनारायणाय नमः
श्री सत्याय नमः
श्री सत्यानंदाय नमः
श्री सत्कवये नमः
श्री नामभ्राजद्गणपतये नमः
श्री अगस्त्यमुनि बोधिताय नमः
श्री चामुंडीगिरि मूलस्थाय नमः
श्री नामसंकीर्तनोत्सुकाय नमः
श्री नित्यहोमाय नमः
श्री निष्कामाय नमः
श्री नित्य श्रीचक्र पूजकाय नमः
श्री श्रीशैल शृंग सुप्रीताय नमः
श्री कोटिलिंग स्थली प्रियाय नमः
श्री तुर्याश्रम समुल्लासाय नमः
श्री होमज्वालाळि मध्यगाय नमः
श्री सच्चिदानंदेश भक्ताय नमः
श्री सच्चिदानंद नामकाय नमः
श्री स्वलीन दत्त सर्वांशाय नमः

श्री दत्तात्रेय स्वरूपिणे नमः

श्री दत्तपीठ स्थापकाय नमः

श्री दत्तक्षेत्र विवर्थकाय नमः

श्री नृसिंह स्थापकाय नमः

श्री सप्तस्वरायतन कारिणे नमः

श्री नादमंडपगाय नमः

श्री विश्वप्रार्थना मंदिदेश्वराय नमः

श्री मूलिकावन संचाराय नमः

श्री दत्तवेंकट वल्लभाय नमः

श्री वाग्गेयकाराय नमः

श्री अद्वंद्वाय नमः

श्री मूलिकारत्न वैद्यकाय नमः

श्री नादवैद्य कळावीराय नमः

श्री नादब्रह्मणे नमः

श्री अव्ययाय नमः

श्री विरागि वंदिताय नमः

श्री रागरागिणी तंत्र रक्षकाय नमः

श्री सप्तसागर सुस्नाताय नमः

श्री सप्तखंड विहारिणे नमः

श्री नानादेशस्थ शिष्याळी सेविताय नमः

श्री नित्यरक्षकाय नमः

श्री धर्मसंस्थापकाय नमः

श्री वेदरक्षकाय नमः

श्री भक्तिबोधकाय नमः

श्री क्रियायोगाचार्यवर्याय नमः

श्री भेदभाव निवर्तकाय नमः

श्री श्री श्री तत्त्वंपदैक्यबोद्ध्रे नमः

श्री अखंडानंददायकाय नमः

श्री गणपति सच्चिदानंद सद्गुरवे नमः

इति श्री श्री श्री गणपति सच्चिदानंद सद्गुरूणां
अष्टोत्तरशत नामाळि समाप्ता

धूपं

श्री विश्व प्रार्थना दिव्य मंदिर स्थापकं गुरुं ।
धूपैरुद्धूपयामि त्वां यशोधूपित दिक्तटं ॥
श्री सद्गुरुभ्यो नमः । धूपमाघ्रापयामि ।

दीपं

नवेंदुमृक्षैरिव सांध्यकालो दीपैर्गुरोत्वामिह दीपयामि ।
त्वया जडे मय्यनुकंपया विभो संविन्मयं

ज्योतिरभिप्रदीप्यतां ॥
श्री सद्गुरुभ्यो नमः । दीपं दर्शयामि । धूपदीपानंतरं शुद्धाचमनीयं
समर्पयामि ।

नैवेद्यं
यद्यन्मया देव तवप्रसादात् सुखं लवं वा घनमेव वाद्यते ।
तत्तेर्पणं तुच्छमतस्स्वदानं तुभ्यं गुरो मां विनिवेदयामि ॥

भक्ष्यं भोज्यं लेह्य चोष्य पानीय फलतद्रसान् ।
निवेदयामि ते भक्त्या भुज्यतां सद्गुरुप्रभो ॥
श्री सद्गुरुभ्यो नमः । नैवेद्यं समर्पयामि । मध्ये मध्ये स्वादूदक पानीयं समर्पयामि । हस्तौ प्रक्षाळयामि । पादौ प्रक्षाळयामि । पुनराचमनीयं समर्पयामि ।

तांबूलं
ताम्यति जनता तांबूलाद्यैर् माद्यति खिद्यत एव गुरो ।
शिष्याणां तद्दोषनिवृत्यै तांबूलं त्वं स्वीकुरु भोः ॥
श्री सद्गुरुभ्यो नमः । तांबूलं समर्पयामि ।

नीराजनं

अनंत ताराग्रह नित्य संभ्रम प्रकल्पितारार्तिक वैभवाय ।
तुभ्यं विराड्रूपधराय सद्गुरो कर्पूर नीराजनमातनोमि ॥
श्री सद्गुरुभ्यो नमः । नीराजनं समर्पयामि ।शुद्धाचमनीयं समर्पयामि ।

मंत्रपुष्पं

यो हृत्सरोजांतर सूक्ष्मरंध्र प्रतिष्ठितार्चिश्श्रय शीर्षभागे ।
विनील मेघांतर विद्युदाभे भातिस्वराट् तं गुरुदेवमीडे ॥
श्री सद्गुरुभ्यो नमः । मंत्रपुष्पं समर्पयामि ।

प्रदक्षिणं

त्वं सर्वतीर्थानपि बंभ्रमीषि सकृत्वहं त्वामभितो भ्रमामि ।
अहो कृपाया भवतो महत्त्वं यतोहमेवास्मि गुरोधिलाभः ॥
श्री सद्गुरुभ्यो नमः । प्रदक्षिण नमस्कारान् समर्पयामि ।

प्रार्थनं

यस्य स्मृतिस्सर्व सुरेश्वरार्चनं नामोक्तिरेवाखिल वेदपाठः
।
गाधाधृतिर्योग विधिस्सपूजा वैगुण्य दोषानपहंतु सद्गुरुः ॥

करोमि त्वत्प्रसादेन सर्वकार्याणि सद्गुरो ।
कामनिर्मूलनं चैव क्रोध विध्वंसनं कुरु ॥
श्री सद्गुरुभ्यो नमः । प्रार्थनं समर्पयामि ।

कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वा प्रकृतेस्स्वभावात् ।
करोमि यद्यत् सकलं परस्मै श्री सच्चिदानंद पदेर्पयामि ॥

सद्गुरु स्तवं

सिद्धि बुद्धि महा योग वरणीयो गणाधिपः
यस्स्वयं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

यस्य दत्तात्रेय भावो भक्तानां आत्म दानतः
सूच्यते सच्चिदानंदं सद्गुरुं तं नमाम्यहं

योगाज्योति स्समुद्दीप्तं जयलक्ष्मी नृसिंहयोः
अद्वयं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

योग विद्या चित्रभानुं चित्रभानु शरद्भवं

ज्ञानदं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

गणेश होमेर्क दिने नित्यं श्री चक्र पूजने
दीक्षितं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

अगस्त्य मुनि संक्रांत नाना वैद्य धुरंधरं
भवघ्नं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

वाद्योदंचद्दिव्य नाम संकीर्तन कलानिधिं
नादाब्धिं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

दत्त पीठाधिपं धर्म रक्षणोपाय बंधुरं
सत्कविं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

विधूत भक्त सम्मोहमवधूतं जगद्गुरुं
स्वाश्रयं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

साधुत्वं भक्तिमैश्वर्यं दानं योगमरोगतां
सन्मतिं ज्ञानमानंदं सद्गुरु स्तवतो लभेत्

श्री गणेशाय नमः श्री सरस्वत्यै नमः श्रीपादवल्लभ नरसिंह सरस्वति
श्री गुरु दत्तात्रेयाय नमः

अनेन मयाकृतेन लघुपूजनेन सकलदेवात्मकः श्री गणपति सच्चिदानंद
सद्गुरुस्सुप्रीणातु । एतत् फलं सर्वं श्री परमेश्वरार्पणमस्तु ॥
श्री गुरु दत्त